
# एकादश: पाठ: । मनोराज्यस्य फलम् ।

पुरा अमरशक्तिः नाम राजा आसीत्। तस्य पुत्राः विवेकरहिताः शास्त्रविमुखाश्च। मनोरञ्जक-कथामाध्यमेन विष्णुशर्मा नाम पण्डितः तान् नीतिशास्त्रपारङ्गतान् अकरोत्। तदर्थं रचितानां कथानां सङ्ग्रहः एव 'पञ्चतन्त्रम्' नाम्ना विख्यातः। (१) मित्रभेदः (२) मित्रसम्प्राप्तिः (३) काकोलूकीयम् (४) लब्धप्रणाशः (५) अपरीक्षितकारकम् इति तानि पञ्च तन्त्राणि। अपरीक्षितकारकात् स्वीकृता प्रस्तुतकथा।

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च।
न पराभवमाप्नोति शक्रादपि कदाचन॥



- दिवास्वप्नः नाम किम्?
- 'यथा चिन्तितं तथैव अभवत्' इति कदाचित् अनुभूतं वा ?



कस्मिंश्चित् नगरे कश्चित् स्वभावकृपणो नाम कोऽपि भिक्षुकः प्रतिवसति स्म। तेन भिक्षया प्राप्तेन सक्तुपिष्टेन कलशः सम्पूरितः। तं च घटं नागदन्ते रज्ज्वा बद्ध्वा तस्याधस्तात् कटं प्रसार्य सततं तद्विषये चिन्तयन् सः सुप्तः। सः अचिन्तयत् – "यत्परिपूर्णोऽयं घटस्तावत् सक्तुपिष्टेन वर्तते। यदि दुर्भिक्षं भवति तर्हि अस्य विक्रयणेन रूप्यकाणां शतं **प्राप्स्यामि**। ततस्तेन अहम् अजाद्वयं **क्रेष्यामि**। ततः षाण्मासिक-प्रसववशात् ताभ्यां यूथः **भविष्यति**। ततोऽजाभिः प्रभूताः धेनूः **ग्रहीष्यामि**, धेनुभिः महिषीः, महिषीभिः वडवाः, वडवाप्रसवतः प्रभूताः अश्वाः **भविष्यन्ति**। तेषां विक्रयणात्प्रभूतं सुवर्णं **प्राप्स्यामि**। सुवर्णेन चतुःशालं गृहं **सम्पत्स्यते**। ततः कश्चित् धनिकः प्राप्तवयस्कां रूपाढ्यां कन्यां मह्यं **दास्यति**। आवयोः पुत्रः **भविष्यति**। तस्याहं सोमशर्मेति नाम **करिष्यामि**। ततः सः जानुचलनयोग्यः **भविष्यति**। एकदा सोमशर्मा मां दृष्ट्वा मत्समीपम् **आगमिष्यति**। ततोऽहं कोपाविष्टः **अभिधास्यामि** भार्याम्, "गृहाण बालकम्" इति। साऽपि मम वचनं न **श्रोष्यति**। तावत्काले कश्चन कुक्कुरः तत्र **आगमिष्यति**। सोमशर्मा तस्मात् भीतः **भविष्यति**। ततोऽहं समुत्थाय लगुडेन तं कुक्कुरं **ताडयिष्यामि**।" एवं स्वप्नमग्नः ध्यानस्थितः सः तथैव लगुडप्रहारम् अकरोत्। तेन लगुडप्रहारेण सक्तुपिष्टेन पूर्णः सः घटः भग्नः अभवत्। स्वभावकृपणः सः पाण्डुरताम् अगच्छत्। अतः ब्रवीमि –

अनागतवतीं चिन्तामसम्भाव्यां करोति यः।
स एव पाण्डुरः शेते सोमशर्मपिता यथा॥

## भाषाभ्यासः



**१. एकवाक्येन उत्तरत ।**

१. भिक्षुकस्य नाम किम् ?
२. स्वभावकृपणेन घटः कुत्र बद्धः ?
३. सोमशर्मा कस्मात् भीतः भविष्यति ?
४. सक्तुपिष्टेन पूर्णः घटः कस्मात् कारणात् भग्नः ?
५. सोमशर्मपितुः नाम किम् ?
६. स्वभावकृपणेन कटः कुत्र प्रसारितः ?

**२. माध्यमभाषया उत्तरत ।**

१. स्वभावकृपणः किमर्थं पाण्डुरताम् अगच्छत् ?
२. 'अपि दिवास्वप्नदर्शनं योग्यम् ?' इति कथायाः आधारेण लिखत ।

**३. (अ) सन्धिविग्रहं कुरुत ।** १) तस्याधस्तात् (२) कदाचिद्रात्रौ (३) सोमशर्मेति (४) ततोऽहम् ।

**(आ) वर्णविग्रहं कुरुत ।** (१) दुर्भिक्षम् (२) रूपाढ्याम् (३) ध्यानस्थितः (४) स्वभावकृपणः

**४. समानार्थकशब्दं लिखत ।** कृपणः, दुर्भिक्षम्, अश्वः, धेनुः, सुवर्णम्, कुक्कुरः ।

### पठत अवगच्छत !

**व्यञ्जनानां विस्तारः ।**

१) भयात् + मुक्तः - भयान्मुक्तः ।
मृत् + मयूरः - मृन्मयूरः ।

वर्गीयव्यञ्जनम् + अनुनासिकम् = वर्गीय-अनुनासिकम्

षट् + मासः = षण्मासः ।
वाक् + मयम् - वाङ्मयम् ।

२) तस्मात् + च = तस्माच्च ।
विद्वत् + जनः =विद्वज्जनः ।

तु + चु = चु

(चु = च वर्गः) (तु = त वर्गः)

अवकारात् + च = अवकराच्च ।
एतत् + जयः = एतज्जयः ।

३) मत् + शरः = मच्छरः ।
श्रीमत् + शङ्करः = श्रीमच्छङ्करः ।

त् + श् =
↓ ↓
च् छ्

तत् + श्रोतुम् = तच्छ्रोतुम् ।
गच्छेत् + शिवः = गच्छेच्छिवः ।

४) तस्मिन् + एव = तस्मिन्नेव ।
इन् + अन्त = इन्नन्त ।

ह्रस्वः स्वरः (पूर्वम्) न् कोऽपि स्वरः (पश्चात्) = न्न

तस्मिन् + उत्सवे = तस्मिन्नुत्सवे ।
कुर्वन् + आसीत् = कुर्वन्नासीत् ।

५) सत् + आचारः = सदाचारः ।
शरात् + अपि = शरादपि ।

वर्गीयव्यञ्जनम् + स्वरः/मृदुव्यञ्जनम्=तृतीयव्यञ्जनम्

षट् + विकाराः = षड्विकाराः ।
तस्मात् + एव = तस्मादेव ।

६) तद् + कृते = तत्कृते । क्षुध् + पीडा = क्षुत्पीडा

वर्गीयव्यञ्जनम् + कठोरव्यञ्जनम् = प्रथमव्यञ्जनम्

षड् + कारः = षट्कारः ।
मृद् + साधितम् = मृत्साधितम् ।